पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्।

# चक्रदत्तः

(चिकित्सासंग्रहग्रन्थः)

महामहोपाध्याय-चरकचतुरानन-श्रीमच्चक्रपाणि
दत्तेन विरचितः
श्रीशिवदाससेनविरचितया
तत्त्वचन्द्रिकासमाख्यया व्याख्यया समलङ्कृतः
पण्डितकुलपति वि.ए. उपाधिधारि-
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्यात्मजाभ्यां
पण्डित- श्रीमदाशुबोध विद्याभूषण- पण्डित- श्रीमन्नित्यबोध-
विद्यारत्नाभ्यां प्रतिसंस्कृतः प्रकाशितश्च

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय
५६ ५७, इन्स्टीट्यूशनल एरिया,
जनकपुरी, नई दिल्ली ११००५८

# चक्रदत्तः

(चिकित्सासंग्रहग्रन्थः)

महामहोपाध्याय-चरकचतुरानन-श्रीमच्चक्रपाणि
दत्तेन विरचितः
श्रीशिवदाससेनविरचितया
तत्त्वचन्द्रिकासमाख्यया व्याख्यया समलङ्कृतः

**पण्डितकुलपति वि.ए. उपाधिधारि-**

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्यात्मजाभ्यां
पण्डित-श्रीमदाशुबोध विद्याभूषण-पण्डित-श्रीमन्नित्यबोध-
विद्यारत्नाभ्यां प्रतिसंस्कृतः प्रकाशितश्च


## राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय

५६-५७, इन्स्टीट्यूशनल एरिया,

जनकपुरी, नई दिल्ली - ११००५८

# सूचीपत्रम् ।


| विषयाः । | पृष्ठाङ्काः । |
|---|---|
| मङ्गलाचरणम् | १ |
| ग्रन्थस्य अभिधेयादिनिर्देशः | ,, |
| **अथ ज्वरचिकित्सा । (Fever.)** | |
| चिकित्सायाः क्रमः | २ |
| नवज्वरे अपथ्यानि | ,, |
| वातादिजज्वरे लङ्घननिषेधः | ३ |
| लङ्घनप्रयोगहेतुः | ४ |
| लङ्घनस्य गुणाः | ,, |
| यथाबल लङ्घनस्य कर्त्तव्यतोपदेशः | ,, |
| अलङ्घनीयाः | ,, |
| सम्यक् लङ्घनस्य लक्षणम् | ,, |
| अतिलङ्घनस्य ,, | ५ |
| ज्वरविशेषे वमनविधिः | ,, |
| ज्वरस्य अवस्थान्तरविशेषे ,, | ,, |
| अवस्थाविशेषे वमनप्रयोगे दोषः | ६ |
| ज्वरविशेषे शीतोष्णपानीयजलविधिः | ,, |
| त्रिविधजलस्य गुणाः | ,, |
| षडङ्गपानीयम् | ७ |
| तरुणज्वरे औषधभेषजप्रयोगस्य निर्दोषता | ,, |
| षडङ्गपरिभाषा | ,, |
| यवागूप्रयोगकालः | ८ |
| ज्वरघ्नी लाजपेया | ,, |
| ,, रक्तशालिकृता पेया | ९ |
| ज्वरे कोष्ठबद्धादौ रक्तशालिकृता पेया | ,, |
| द्वन्द्वसन्निपातज्वरे पेया | ,, |
| सन्निपातज्वरे ,, | ,, |
| अल्पकषायसाध्ययवागूपाकपरिभाषा | ९ |
| पेयादिषु क्वाथसाधनपरिभाषा | १० |
| यवाग्वा मात्रा | ,, |
| मण्डादीनां लक्षणम् | ,, |
| अन्नादिपाके जलपरिमाणनिर्देशः | ११ |
| अवस्थाविशेषे यवाग्वा अहितकारिता | ,, |
| ज्वरविशेषे ,, ,, | १२ |
| निषिद्धयवागूज्वरे तर्पणप्रयोगविधिः | ,, |
| तर्पणस्वरूपम् | १३ |
| वातजादिज्वरे अन्नदानविधिः | ,, |
| यवाग्वादिनिमित्तं ज्वरापहतण्डुलनिर्देशः | ,, |
| द्वन्द्वजज्वरे यूषाः | ,, |
| ज्वरे यूषार्थं हितफलनिर्देशः | १४ |
| ,, शाकनिर्देशः | ,, |
| ,, हितभोजनस्य अवश्यकर्त्तव्यता | ,, |
| ,, अरुचौ मातुलुङ्गादियोगद्वयम् | १५ |
| ,, पथ्यद्रव्ये अरुचौ रुचिजननोपायः | ,, |
| ,, पथ्यदानकालः | ,, |
| ,, गुरुपाकादिद्रव्यसेवननिषेधः | १६ |
| नवज्वरे पाचनानि | ,, |
| तरुणमध्यपुराणज्वराणामवधिनिर्देशः | १७ |
| नवज्वरे पाचनादिकषायदानविधिः | ,, |
| अवस्थाविशेषे पाचन-शमनकषाययोः दानविधिः | १९ |
| रससामतालक्षणम् | ,, |
| सामज्वरे औषधदानस्य अनिष्टकारिता | २० |

लङ्घनस्य सीमानिर्देशः।—

त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा।
लङ्घनं सन्निपातेषु कुर्य्याद्वाऽऽरोग्यदर्शनात्॥ १५१॥

लङ्घनसहत्वे हेतुनिर्देशः।—

दोषाणामेव सा शक्तिर्लङ्घने या सहिष्णुता।
न हि दोषक्षये कश्चित् सहते लङ्घनादिकम्॥ १५२॥

आर्द्रकादिनिष्ठीवनम्।—

आर्द्रकस्वरसोपेतं सैन्धवं कटुकत्रयम्।
आकण्ठं धारयेदास्ये निष्ठीवेच्च पुनः पुनः॥ १५३॥
तेनास्य हृदयात् श्लेष्मा मन्यापार्श्वशिरोगलात्।
लीनोऽप्याकृष्यते शुष्को लाघवञ्चास्य जायते॥ १५४॥
पर्वभेदोऽङ्गमर्दश्च मूर्च्छाकासगलामयाः।
मुखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति॥ १५५॥
सकृद्द्विस्त्रिचतुः कुर्य्यात् दृष्ट्वा दोषबलाबलम्।
एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम्॥ १५६॥

---

कफं, कफोऽपि तथा वायुं, पित्तञ्च द्रवत्वेन कफं, कफोऽपि तथा पित्तमिति गुणसाम्यम्; न च वाच्यं, विपरीतस्तु गुणो भूयान् अन्यं समानगुणमभिभूय प्रशमयत्येव; कुतो न करोत्येव? यतो दूष्यापेक्षया त्रिदोषकारणस्य प्रभावाच्च दोषगुणा दूषयन्ति परं न शमयन्तीति; दृढबलस्त्वाह—"विरुद्धैरपि न त्वेते गुणैर्घ्नन्ति परस्परम्। दोषाः सहजसात्म्यत्वात् घोरं विषमहीनिव॥" (च० चि० त्रिमर्मीय०) इति। अस्यार्थस्तु अस्मत्कृतचरकतत्त्वप्रदीपिकायामनुसन्धेयः॥ १४९।१५०॥

लङ्घनं सूचयित्वा दोषभेदेन तदवधिमाह, त्रिरात्रमित्यादि।—त्रिरात्रादि लङ्घनविधिविकल्पो यथाक्रममुल्वणवातादपेक्षया ज्ञेयः। कुर्य्याद्वाऽऽरोग्यदर्शनादित्यभिधानं समग्रदोषक्षयापेक्षया बलसम्पत्तौ च ज्ञेयम्॥ १५१॥

एतावन्तं कालं कथं लङ्घनं कर्त्तुं शक्यम्? इत्याशङ्क्याह, दोषाणामित्यादि।—"लङ्घनादिकम्" इत्यत्र आदिशब्दात् वालुकास्वेदादीनामपि ग्रहणम्॥ १५२॥

निष्ठीवनमाह, आर्द्रकेत्यादि।—आर्द्रकस्वरसयुक्तं कृत्वा सैन्धवादिचूर्णमनुरूपं दद्यात्। निष्ठीवनमुपदिशन्ति वृद्धाः॥ १५३—१५६॥